मस्य वा। व्यजने हेमच०(पाखा) "तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते" उद्भटः। अस्य वायोर्गुणा यथा। "त्रिदोषशमनोवायुर्लघुरः प्रकीर्त्तितः" भावप्र० "तालवृन्तभवो वायुस्त्रिदोषजयनो लघुः" राजनि०। "न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्" कुमा०। स्वार्थे क वा० वा०कप् वा। तालवृन्तक तत्रार्थे अमरः।

**तालव्य** त्रि० तालुनि भवः देहावयवत्वात् यत्। तालूच्चार्य्येषु "इचुयशानां तालु" इत्युक्तेषु वर्णभेदेषु।

**तालाकट** पु० दक्षिणस्थे देशभेदे। तालाकटस्य राजा अण् सोऽभिजनोऽस्य वाऽण्। २तद्देशवासिजने ३तन्नृपे च बहुषु अणो लुक्। "ततः शूर्पारकं चैव तालाकटमथापि वा। वशेचक्रे महातेजा दण्डकांश्च महाबलम्" भा० स० ३०। सहदेवदक्षिणदिग्विजये। अयमेव देशः तालकटत्वेन वृ०स० १४ अ० उक्तः तालकटशब्दे दृश्यः।

**तालाख्या** स्त्री तालं तत्पत्रमिवाख्यायते आ+ख्या घञर्थे कर्म्मणि क। सुरानामगन्धद्रव्ये शब्दच०। [अमरः।

**तालाङ्क** पु० तालस्तालचिह्नितः अङ्कः ध्वजोऽस्य। बलदेवे।

**तालादि** पु० "तालादिभ्योऽण् वा" पा० विकारार्थे अण्प्रत्ययनिमित्ते शब्दसमूहे। स च गणः पा०गणसू०उक्तो यथा (तालाद्धनुषि) बार्हिण इन्द्रालिश इन्द्रादृश इन्द्रायुध चय, श्यामाक पीयूक्षा"। तालं धनुः पक्षे अञ्मयटौ। तालं तालमयं वा मद्यम्।

**तालावचर** पु०तालेनावचरति अव+चर-अच्। नटे त्रिका०

**तालि** स्त्री तल-प्रतिष्ठायां णिच्-इन्। भूम्यामलक्यां वा ङीप्। तत्रार्थे (ताड़ियात्) २ख्याते वृक्षे भरतः। "वर्त्मभिः पवनोद्धूतराजतालीवनध्वनिः" रघुः।

**तालिक** पु० तालेन करतलेन निर्वृत्तः ठक्। चपेटे (चापड़) (हाततालि)। ताली+स्वार्थे क। २तालमूल्याम् स्त्री हेमच०। ३लिखितस्य निबन्धने च शब्दर०। ४चपेटे स्त्री शब्दर०। ५ताम्रवल्ल्यां स्त्री राजनि०। "स्वैरं कृतन्यद्य विधाय तालिकाम्" काशी० ५ अ०। "उद्घाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः" नैषधम्। [भाण्डे ३गुणे च अजयपालः।

**तालित** न० चुरा० तड़-क्त डस्य लः। १तुलितपटे २वाद्य-

**तालिन्** पु० ब० व०। तलेनर्षिणा प्रोक्तमधीयते शौनकादिणिनि। तलोक्ताध्येतृषु। तालो वाद्यत्वेनास्त्यस्य इनि। २दत्तताले त्रि० ३शिवे पु० "वैणवी पणवी ताली खली कालकटः कटः" भा० अनु० १७। शिवनामोक्तौ।

**तालिश** न० चु० तल-श न शित्त्वम्। पर्वते उणादिको०।

**ताली** स्त्री तालेन तन्निर्यासेन निर्वृत्ता अण्। (ताड़ी) १तालजातसुरायाम्। तल-णयन्तात् अच् गौरा०ङीष्। (ताड़ियात्) २वृक्षभेदे, अमरः। ३तालमूल्याम्, (भूइआमला) ४वृक्षभेदे राजनि०। ५आढ़कक्याम्, (अड़हर) शब्दरत्ना०। ६तालीशपत्राख्ये वृक्षे, रत्नमाला। ७तालकोद्घाटनयन्त्रे (काटि) कुञ्चिकायाञ्च। हेमच०। ८ताम्रवल्ल्यां ९दशाक्षरपादके छन्दोभेदे यथा "ताली सा निर्दिष्टा। उद्दिष्टो मो यत्र" यथा "ज्ञानी ते जानीते। साद्रूप्यं वैरूप्यम्" छन्दोमञ्जर्याम्। अस्य नारीत्यपि संज्ञोक्ता।

**तालीपत्र** न० ताल्या इव पत्रमस्य। तालीशपत्रे राजनि०।

**तालीश** न० तालीव रोगान् श्यति शो-ड। स्वनामख्याते वृक्षे राजनि० "तालीशं लघु तिक्तोष्णं श्वासकासकफानिलान्। निहन्त्यरुचिगुल्माग्निवह्निमान्द्यक्षयामयान्" भावप्र० २भूम्यामलक्यां मेदि०।

**तालीशपत्र** न०तालीशं रोगनाशकं पत्रं यस्य। १स्वनामख्याते वृक्षे, २भूम्यामलक्याञ्च राजनि०।

**तालीशाद्यमोदक** पु०चक्रदत्तोक्ते मोदकभेदे यथा "तालीशपत्रं मरिचं नागरं पिप्पली शुभा। यथोक्तसंभागवृद्ध्या त्वगेले चार्द्धभागिके। पिप्पल्यष्टगुणा चात्र प्रदेया सितशर्करा। श्वासकासारुचिहरं तर्पणं दीपनं परम्। हृत्पाण्डुग्रहणीरोगप्लीहशोषज्वरापहम्। छर्द्यतीसारकासघ्नं मूढ़वातानुलोमनम्। कल्पयेद् गुड़िकां चैतच्चूर्णं पक्वासितोपलाम्। गुड़िका ह्यग्निसंयोगाच्चूर्णाल्लघुतरा स्मृता। पैत्तिके पाहयन्त्यके शुभाय वंशलोचनम्"।

**तालु** न० तरन्त्यनेन वर्णाः तृ-ञुण् रस्य लः। जिह्वेन्द्रियाधिष्ठाने (तेलो) स्थानभेदे। "मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते। ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते" भाग०। "निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः। जिह्वयांशेन च रसान् ययासौ प्रतिपद्यते" भाग० ३।६।१४श्लो० तालुनि चैकमस्थि तच्च कपालाकारं यथोक्तं सुश्रुते अस्थीनीत्युपक्रमे "एतानि पञ्चविधानि भवन्ति। तद्यथा कपालरुचकतरुणवलयनलकसंज्ञानि। तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि" अस्थिसंख्याभेदोक्तौ च तत्रैव। तालुनि चैकमित्युक्तम्। "तृषा महत्या परिशुष्कतालवः" ऋतुसं०। स्वार्थे यावा०कन्। तालुकमप्यत्र अमरः।